*Rajeshkumar. M., (September 2018).,Int.J.Res.Ins.,Vol 5 (Issue 2).,pp 11-16*

International Journal of Research Instinct
(Peer-reviewed Journal)

ISSN ONLINE 2348-2095
Research Article

# सीतोदितपरित्रताचरणात् गुहसत्कारपर्यन्तम्

**M. Rajeshkumar**
*Department of Sanskrit, Rajah's College, Thiruvaiyaru.*

## उपोद्घातः

परमात्मना लोका: सृष्टाः । तेषु लोकेषु अन्यतमो लोकः भूलोकः । अस्मिन् भूलोक एव पशुपक्षिप्राणिनां मनुष्याणाञ्च सृष्टिरभवत् । अयं लोकः किमाधारीकृत्य वर्तते । अस्य लोकस्य लोकवर्तिनाञ्च परस्परं सापेक्षत्वं वर्तत उत निरपेक्षत्वं वा इति चिन्त्यते चेत् तदुत्तरं एवं भवति । लोकः भगवदधीनं तस्मात् तस्य सोपक्षेत्वं वर्तत एव । अस्मिन् विषये उद्यनाचार्योऽपि स्वस्य न्याय कुसुमाञ्जल्यां एवं वक्ति -

[1]सापेक्षत्वात् अनादित्वात वैचित्र्यात् विश्ववृत्तितः ।

प्रत्यात्मनियतत्वात् हेतुभुक्तिरलौकिकः ॥ इर्त

जीवराशिन एवं मनष्याश्च आहारनिद्रास्नानपानादिषु समानाः चेदपि [2]लोको भिन्नरुचिः इतिवत् गुणतः स्वभावतः भिन्नाः भवन्ति । अत्र गुणशब्दश्रवणेन गुण शब्दस्य अर्थः कः ? सः कीदृशः ? सः शब्दः कुत्र वा प्रयुज्यते ? तस्य महत्वं किम् ? इत्यादिविषये जिज्ञासा जायते । लोके बहूनि शास्त्राणि सन्ति । तत्र सर्वत्र प्रायः गुणविषयाः प्रोक्ताः स्युः । उदाहरणार्थं अलङ्कारशास्त्रे [3]गुणालङ्कारसहितौ शब्दार्थौ इति । न्यायशास्त्रे पदार्थकथनवेलायां सप्तपदार्थेषु द्वितीयपदार्थः [4]गुणः, चतुर्विंशतिरिति । [5]मीमांसाशास्त्रे विधिविभागे गुणविधिः, [6]व्याकरणशास्त्रे आद्गुणः, अदेङ्गुणः, [7]सांख्ये त्रिगुणमविवेकि वेदान्ते [8]सत्यं ज्ञानं अनन्तं ब्रह्म इत्यादयः गुणशब्दवाचकाः । शास्त्रदृष्ट्या बहवः गुणाः वर्तन्ते । भगवतः अष्टौ गुणाः प्रकीर्तिताः अपहतपाप्मा, विजरः, विमृत्युः, विशोकः, विजिघित्सा, अपिपासः, सत्यकामः, सत्यसङ्कल्पः ।

परन्तु लोके अयं समीचीनः अयं असमीचीनः इति व्यवहारः वर्तते खलु ? तत्

1. न्यायकुसुमाञ्जलिः (४) 2. मालविकाग्निमित्रम् 3. काव्यप्रकाश: (१-१), 4. तर्कसङ्ग्रहः, 5. परिभाषा,

6. पाणिनीयम् 7. सांख्यकारिका(११) 8. तैत्तरीयोपनिषद् (१-२)।

कथम् ? कस्मात् स गुणः मनुष्येषु देवेषु च दृश्यते । सर्वे वेदाः, शास्त्राणि, इतिहासपुराणानि भगवन्तं स्तुवन्ति गुणगानं च कुर्वन्ति । भगवता कृतावतारेषु रामावतारे एव जनानां सर्वेषां अभिरुचिः वर्तते । कारणं स एव रामः "गुणवान्" इति विख्यातिं प्राप्तवान् ।

लोकेषु विद्यमानेषु काव्येषु आदिकविना विरचितं काव्यं श्रीरामायणमहाकाव्यम् । अस्मिन् काव्यविषये वाल्मीकिमहर्षिः स्वयं वक्ति -

[1]काव्यं रामायणं कृत्स्नं सीतायाः चरितं महत् ।
पौलस्त्य वधमित्येव चकार भगवान् ऋषिः ॥
[2]कामार्थगुणसम्युक्त धर्मार्थगुणविस्तरम् ।
समुद्रमिव रत्नाढ्यं सर्वश्रुतिमनोहरम् ॥ इति ॥

सर्वश्रुतिमनोहरकाव्यान्तर्गते रामायणे अयोध्याकाण्डे **सीतोदितपरित्रताचरणात् गुहसत्कारपर्यन्तम्** इमं विषयमाधारीकृत्य पञ्चविंशतिसर्गान्तर्गतविषयान् क्रोडीकृत्य विस्तरभयात् संगृह्य लिखित्वा अस्यां राष्ट्रियसंस्कृतसङ्गोष्ठ्यां समर्पणं करोमि ।

## अयोध्याकाण्डे २६ सर्गादारभ्य ५० सर्गपर्यन्तं उक्तविषयांशाः -

सीताप्रत्यवस्थापनम्, पतिव्रताध्यवसायः, वनदुःखप्रतिबोधनम्, वनानुगमन-याज्ञानिर्बन्धः, वनगमनाभ्युगमपत्तिः, लक्ष्मणवनानुगमनाभ्यनुज्ञा, वित्तविश्राणनम्, पौरवाक्यम्, दशरथसमाश्वासनम्, सुमन्त्रगर्हणम्, सिद्धार्थप्रतिबोधनम्, चीरपरिग्रहे वसिष्ठक्रोधः, जनाक्रोशः, वनगमनापृच्छा, पौराद्यनुव्रज्या, नगरसंक्षोभः, दशरथाक्रन्दः, कौसल्यापरिदेवितम्, सुमित्राश्वासनम्, पौरयाचनम्, पौरमोहनम्, पौरनिवृत्तिः पौराङ्गनाविलापः, जानपदाक्रोशः, गुहसंगतम् ।

1. श्रीरामस्यौदासीन्यं दृष्ट्वा सीतयां तं प्रति तत्कारणस्य जिज्ञासनं पितुराज्ञया वनं गन्तुमात्मनो निश्चयं ब्रुवता श्रीरामेण गृहेऽवस्थातुं सीतायाः बोधनम् -

अहं गमिष्यामि महावनं प्रिये । त्वया हि वस्तव्यमिहैव भामिनि ॥ इति ।

2. आत्मानमपि सहैव नेतुं सीतायाः श्रीरामं प्रति प्रार्थना

1 & 2. वाल्मीकिरामायणम्

अनन्यभावामनुरक्तचेतसम् त्वया वियुक्तां मरणाय निश्चिताम् ।
नयस्व मां साधुकुरुष्वयाचनाम् ॥ इति

3. वनवासे क्लेशं वर्णयता श्रीरामेण सीतायाः तत्र गमनान्निवारणम् ।

वने भीतिदायकाः सिंहगजशार्दूलशरभाः क्रूरमृगाः पतङ्गाः वृश्चिकाः, कीटा दंशाश्च वसन्ति । अतः -

' वनं तु नेतुं न कृता मतिः ' इत्यवोचत् ।

4. सीतया श्रीरामं प्रति तेन सहात्मनो वनगमनौचित्यस्य प्रतिपादानम् -

सीता रामवचनं श्रुत्वा एवं अब्रवीत् ।

' वनवासे हि जानामि दुःखानि बहुधा किल ' ॥ इति

एवं सिंहगजशार्दूलमृगाः तव अदृष्टपूर्वरूपं दृष्ट्वा अपसर्पेयुः । अतः

गमनं वनवासस्य काङ्क्षितं हि सह त्वया ' इत्युक्त्वा '

नेतुमर्हसि काकुत्स्थ समानसुखदुःखिनीम्

- इति बहुविधं तं गमनं प्रति याचते सीता ।

5. सीताया वनगमनाय भृशमाग्रहं विलापं व्याकुलतां च अवलोक्य श्रीरामेण तस्यै स्वेन सह वनं चालितुमनुज्ञाप्रदानं पितुर्मातुर्गुरूणाञ्च सेवाया महत्त्वस्य वर्णनं वनगमनोपक्रमाय गृहवस्तूनि ब्राह्मणादिभ्यो दातुं सीतां प्रत्यादेशदानं च -

“ सान्त्व्यमाना तु रामेण मैथिली जनकात्मजा ।

वनवासनिमितार्थं भर्तारमिदमब्रवीत्" ॥

माम् वनं न नीयते चेत् मम पिता त्वां किं अमन्यत ।

रामं जामातरं प्राप्य स्त्रियं पुरुषविग्रहं इति खलु अमन्यत ।

इति जानन् परां प्रीतिं गच्छ राम मया सह ॥ इत्यब्रवीत्

6. श्रीरामलक्ष्मणसंवादः श्रीरामस्यादेशेन लक्ष्मणस्य सुहृज्जनान् आमन्त्र्य दिव्यमायुधमानीय च वनं गन्तुमुद्यमः श्रीरामेण तं प्रति ब्राह्मणेभ्यो धनं वितरितुं स्वकीयविचारस्य प्रकटनम् ।

7. सीतया सह श्रीरामेण वसिष्ठं सुयज्ञमाहूय तस्मै तत्पत्न्यै च महार्हाभूषणरत्नधनप्रभृतीनां दानं सलक्ष्मणेन रामेण ब्राह्मणेभ्यो वटुभ्यो निजाश्रितेभ्यः सेवकेभ्यः त्रिजटाख्याय विप्राय सुहृज्जनेभ्यश्च धनस्य दानम् ।

8. सीतालक्ष्मणसहितस्य श्रीरामस्य दुःखमग्रपौरजनमुखेभ्यो विविधा वार्ताः श्रावं श्रावं पितुर्दर्शनार्थं कैकेय्या भवने गमनम् ।

9. सीतालक्ष्मणसहितेन श्रीरामेण सस्त्रीगणस्य राज्ञः पार्श्वं गत्वा वनवासायानुज्ञायाः प्रार्थनं राज्ञः शोको मूर्च्छा च श्रीरामेण तस्य सान्त्वनं श्रीराममुरसाऽऽश्लिष्य राज्ञो भूयो विसंज्ञता च ।

10. सुमन्त्रेण प्रबोधिताया भर्त्सितायाश्च कैकेय्या अक्षोभः ।

11. श्रीरामेण सह सैन्यं कोषं च प्रेषयितुं राज्ञो दशरथस्यादेशः कैकेयीकर्तृकस्तस्य विरोधः सिद्धार्थेन कैकेय्या प्रबोधनं राज्ञा स्वयमपि श्रीरामेण सह वनं गन्तुमिच्छायाः प्रकटनम् ।

12. सलक्ष्मणेन श्रीरामेण वल्कलवस्त्रस्य धारणं सीताया वल्कलधारणेनान्तःपुरस्त्रीणां खेदो गुरुणा वसिष्ठेन कैकेयीं निर्भर्त्स्य सीतायाः वल्कलधारणविरोधश्च ।

13. सीताकर्तृकवल्कलधारणस्यानौचित्यं प्रतिपाद्य राज्ञा कैकेय्या भर्त्सनं श्रीरामस्य राजानं प्रति कौसल्यायां

कृपादृष्टिं कर्तृमनुरोधश्च ।

14. राज्ञो दशरथस्य विलापस्तदाज्ञया सुमन्त्रेण श्रीरामस्य कृते रथस्यानयनं कोषाध्यक्षेण सीतायै बहुमूल्यवस्त्राभूषणानां समर्पणं कौसल्यायाः सीतां प्रति पतिसेवाया उपदेशः सीतया तस्याङ्गीकरणं श्रीरामस्य मातरं प्रति राज्ञि दोषदृष्टिं परित्यक्तुमनुरोधोऽन्या मातॄश्च सम्बोध्य वनं गन्तुमनुज्ञाप्रार्थानं च ।

15. दशरथं परिक्रम्य ससीतालक्ष्मणस्य श्रीरामस्य कौसल्याप्रभृतिमातॄः प्रति प्राणामः, सुमित्राया लक्ष्मणं प्रत्युपदेशः , रथ उपविश्यरामादीनां वनं प्रति प्रस्थानं पौरैः राज्ञीभिश्च सह दशरथस्य सशोकावस्था ।

श्रीरामस्य वनगमनेनान्तः पुरस्त्रीणां विलापः पुरवासिनां सशोकावस्था च ।

16. राज्ञो भुवि निपतनं श्रीरामस्य कृते विलपनं च, कैकेयीकर्तृकनिजाङ्गस्पर्शस्य राज्ञा निषेधः कैकेय्याः परित्यागश्च, कौसल्यायाः सेवकानां च सहकारेण तस्य कौसल्याभवने गमनं तत्रापि श्रीरामस्य कृते तेन दुःखस्यैवानुभवकरणम् ।

17. कौसल्यायाः विलापः ।

18. सुमित्रायाः कौसल्याया आश्वासनम् ।

19. भरते महाराजे दशरथे च प्रणयं रक्षितुमनुरुन्धतः श्रीरामस्य पुरवासिनः प्रति पुरे निवर्तनाय प्रार्थना, पौराणां वृद्धब्राह्मणानां रामं प्रति पुरे निवर्तितुमाग्रहस्तैः सह श्रीरामस्य तमसातटे गमनम् ।

20. सीतालक्ष्मणाभ्यां सह श्रीरामस्य रात्रौ तमसातटे निवासस्तत्र मातुः पितुरयोध्यायाश्च कृते तदीया चिन्ता, सुप्तान् पौरजनान् विहाय तस्य वनं प्रति गमनम् ।

21. प्रातः प्रबुद्धानां पौराणां विलापो निराशानां च तेषांनगरे निवर्तनम् ।

22. पुरवासिनीनां स्त्रीणां विलापः ।

23. ग्राम्याणां वार्तां शृण्वतः श्रीरामस्य कोसलसीमानमतिक्रम्य गमनं वेदश्रुतिगोमतीस्यन्दिकाख्याः सरितः समुत्तीर्य्य तस्य सुमन्त्रं प्रति किंचिन्निवेदनम् ।

24. मार्गे श्रीरामेणायोध्यापुरीतो वनवासायानुज्ञाप्रार्थनं शृङ्गवेरपुरे गङ्गातटे समुपस्थाय तत्र रात्रौ तस्य निवासो निषादराजेन गुहेन तस्य सत्कारश्च ।

शृङ्गिबेरपुरे सूतं गङ्गाकूले व्यसर्जयत् ।
गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ॥

सूतत्वेन सुमन्त्रस्यानुगमनं नियोगकृतम् । वनभूमिपर्यन्तं रथेन सारथित्वेनानुगमनं विहितम् । तदनन्तरं अनुगमनं याचितं तेन, किन्तु नाभ्यनुज्ञातम् । अनुगन्तुमिच्छन्तं व्यसर्जयत् रामः । ' श्रुङ्गिबेरपुरे' शृङ्गिणां कृष्णसाराणां बेराणिकृत्रिम शरीराणि, वञ्चनेन सजातीयमृगग्रहणार्थानि यस्मिन् तत् शृङ्गि बेरपुरम् इति गोविन्दराजः । पुर नामैव वञ्चनावृत्तिद्योतकम् । व्यसर्जयत् इति णिचा अनिच्छतो बलाद्विसर्जनं द्योत्यते । " गङ्गाकूले सूतम् " सूतपदं रथमप्युपलक्षयति । ससम्बन्धिकः शब्दः । " निवर्तस्वेत्युवाचैनमोतावद्धि कृतं मया । रथं

विहाय पद्भ्यां तु गमिष्यामो महावनम्" इति गास्यातेऽयोध्याकाण्डे । "गुहमासाद्य धर्मात्मा" । शृङ्गिबेरपुरे इति पुरनाम्नैव मृगवञ्चकत्वं सूचितम् । "गुह" इति नामापि वञ्चनपरत्वद्योतकम् । "गुहतिगोपयति वञ्चयति परस्वमिति गुहः" इति गोविन्दराजः । गङ्गाकूले इत्यनेन बहुपुष्पबलवान् सुमहानिङ्गुदीपादपोप्युपलक्ष्यते, यत्र गुहो वृद्धैरमात्यैर्ज्ञातिभिश्च परिवृतो राममुपागतः । शृङ्गिबेरपुरे इङ्गुदीपादपच्छायायां गुहेन सहितोऽभूत् । इङ्गुदीपादपः सोयं शृङ्गिबेरपुरे पुरा ' (उत्तररामचरिते) इति भवभूतिः । ' गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियम् ' । आसाद्य इत्यत्रापि विधिवाचिना (आङा) अर्थान्नैरन्ध्यमुक्तं इति गोविन्दराजोक्तं रमणीयम् । ' तमार्तः संपरिष्वज्य गुहः ' इति संपरिष्वङ्ग पर्यन्त नीरन्ध्रसंश्लेषाभ्यनुज्ञां व्यज्यते । ' आसाद्य ' इत्यत्र (आङ् उपसर्गेण समागमनं व्यज्यते) ततो नीरन्ध्रसंश्लेषाभ्यनुज्ञां व्यज्यते । सहसौमित्रेण रामः समागच्छद्गुहेन सः "इत्ययोध्याकाण्डे रामो गुहसमीपं सलक्ष्मणो जगामेत्यर्थो ग्राह्यः ।" जात्या वृत्तेन चात्यन्तनिहीनेनेत्थं पुरस्करणनीरन्ध्रसंश्लेषादि-भिरस्य धर्मात्मत्वं सुतरां प्रकाश्यत इति व्यज्यते "गुहमासाद्य धर्मात्मा" इति समभिव्याहारेण । भुजाभ्यां पीनवृत्ताभ्यां पीडयन् वाक्यमब्रवीत् इति रामकर्तृकपरिष्वङ्गोऽपि गास्यते । ' निषादाधिपतिं प्रियम् ' इत्यनन्तरपठनेन च इदमेव व्यज्यते । रामस्य आत्मसमः सखा इति स्मार्यते प्रियमिति ।

## उपसंहारः

" वशी वदान्यो गुणवान् ऋजुः रुचिः मृदुर्दयालुर्मधुरः स्थिरः रामः ।" इति यामुनाचार्यस्तोत्ररत्न श्लोकभाष्ये श्रीवेङ्कटनाथैः भाषितम् । अत्र यद्वा गुण्यते आवर्त्यते पुनः पुनः आश्रितैः अनुसन्धीयते इति गुणः सौशील्यम् । सुशीलं हि नाम महतोमन्दैः सह नीरन्ध्रेण संश्लेषः । तस्याधिल्क्यं सौशील्यम् तद्वान् कः ? इत्यस्य सौशील्यगुणवान् भगवान् रामः इति भवति । सर्वस्मात् परस्य ईश्वरस्य सौशील्यगुणः जनताचितरञ्जकतमः ।

" निषादानां नेता कपिकुलपतिः कापि शबरी
कुचेलः कुब्जा सा व्रजयुवतयो माल्यकृदिति ।
अमीषां निम्नत्वं वृषगिरिपतेः उन्नतिमपि
प्रभूतैः स्रोतोभिः प्रसभमनुकम्पे समयसि ॥" (दया । श । ६५)

इति भगवतः सौशील्यरूपदया गुणानुभवः ज्ञातव्यः । अत्र वाल्मीकिना सौशील्यगुणारसाकृष्टः " कः कः " इति पुनः पुनरावर्तयतीव गुणयतीव । परमपुमानेव किं अस्मिन् मानुषे लोके नरो बभूव इति विस्मयरसाविष्कारः कृतः । रामावतारे परत्वं रामेणापि विस्मृत प्रायम् । अतः तेन रामत्वम्व्वाभिमन्यते ।

॥ इति शम् ॥

## उपयुक्तग्रन्थाः

1. काव्यप्रकाशाः
चौखम्बा सुरभारती प्रकाशन
वाराणासी 1987
2. तर्कसंग्रहः
व्यासप्रकाशन्
वाराणासी 1989
3. तैत्तरीयोपनिषत्
उभयवेदान्तग्रन्थमाला
चेन्नै 1974
4. न्यायकुसुमाञ्जलिः
चौखम्बा सुरभारती प्रकाशन
वाराणासी 1968
5. पाणिनीयम्
मुद्राशिल्प आफ्सेट् प्रिण्टर्स
बजाज् नगर्
नागपुर 2007
6. मीमांसापरिभाषा
सीताराम शामत्री साहित्य भण्डार्
सुभाष् बाजार् मेरठ् 1975
7. मालविकाग्निमित्रम्
चौखम्बा सुरभारती प्रकाशन
वाराणासी 1968
8. वालमीकिरामायणम्
गीता प्रेस् गोरख् पुर् 1984 .
9. सांख्यकारिका
रामकृष्ण मठ
चेन्नै 1995
10 दयाशतकम्
श्रीवैकुण्ठनाथ देवस्थान्
कल्कत्ता 1960